M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1329

Keith

Title: Kaivalya [illegible]ipika]

[illegible]

1329

In Complete

	Kaivalya Dipika	:	Title
		:	Author
		:	Editor
		:	Year, Vols.
	1687	:	Publisher
1329	Pages 16 to 22	:	Remarks

Vedānta

॥नमो श्रीगणेशाय॥ ॐ नमः श्रीपरमात्मने पुरुषोत्तमाय॥ ॥यत्र ज्योतिरुन्मि
षति येन सिद्धमेव मानसं चक्षुषामिह वशे परिकर्ममुख्यैः॥ नच्छुद्ध सत्त्वमुकुर
प्रतिबिंबभावात् रूपत्राभिधामुपगतं नु विभावये मा॥१॥ समूलघातं प्रतिहत्य यो
धं मलिनी च येन यत्ने मनीषां॥ यत्पादसंगात्कृतिनीकृतार्था गुरुं विवस्वंतं मिहानुवेतं॥
॥२॥ श्रीबोपदेवस्य निधेर्गुणानां जयंति ते नु विवाग्विलासाः॥ विकुंठ येषु स्वयमी
श्वरोपि सर्वज्ञताबृंहस्य मनैव निरूढं॥३॥ अस्मिन्समस्मिन्नपि वाङ्मयाब्धावपारपारी
ण मनीषयोच्चैः॥ विरप्रवेतन्विक्रु उवस्तु नेदं गुणेयानु विनास्य कैः कैः॥४॥ अमुष्य वैर
स्य निधेर्हरिस्तरोमुदे द नेत्र नकस्य सूक्तयः॥ मुक्ताम्रघाट्ठे षिमनांस्यनारतं वियो १
गिहं हीव कलाः कलानिधेः॥५॥ तेन मुक्ताफलं तेनेयं द्नो कृमनुग्रहं ता॥ नत्र टीकायपाहु
द्वि कुर्वे कैवल्यदीपिकां॥६॥ स्पष्टां त्रिलोककगुरुणा द्व मिवं दु लेखां सर्वज्ञमीडनकरी॥

मकलंककरां करोति॥ टीकां प्रियां परमहंसजनस्य दद्यात् कुर्यामिमां नहि हयां तु बुधाः प्रसादं॥७॥ इ
ह मुमुक्षूपकाराय रुचिरं प्रकरणं चिकीर्षुराचार्यस्तस्य परिसमाप्तिप्रचयपरिपंथिविघ्न
विघाताय शिष्टाचारपालनाय च समुचितेष्टदेवतां वंदमानस्तत्प्रतिपाद्यमर्थं श्रोतृप्रव
र्त्यंगतया संक्षिप्याह। विष्णुमित्यादि॥ ॥मू॥ विष्णुं पंचात्मकं वंदे भक्त्या षोडशभेदया॥ सां
गवर्गीनविंशत्या भक्तैर्नवभिराश्रितं॥१॥ ॥पंच आत्मान उपाधिभिन्नानि स्वरूपाणि
यस्य स तथा। पंचस्वपि विष्णुशब्दो व्याप्तिविवक्षया मंगलार्थत्वाच्च प्रायुक्तः। तं वंदे नमस्कु
र्वे। भक्त्येति। षोडशभेदया भक्त्या। भक्तैराश्रितमित्युभयेणान्वयः। सांगेति। अंगानाम
संगत्वादीनां वर्गः समूहः अंगवर्गः तेषामूनविंशतिः। तया सह वर्तत इति सांगवर्गोनविं
शतिः। तया। भक्तिविशेषणं चैतत्॥ ननु समैव वर्ग इति समसमूहे संकेतितो वर्गशब्दः कथमनि
हत्तद्वैपरीत्ये प्रयुक्त इति। सत्यं किंतु जातिमात्रे तत्र विवक्षितं। न तु संख्यासाम्यं। त्रिवर्ग इ

त्यादि स्वयमुक्तेः। यद्यप्यूनविंशतीत्यविशेषेणोक्तं। तथापि प्रत्यासत्तेर्लौकिकरूढेश्चैकोनविंश
तित्वं ज्ञेयं। न त्वेकैर्नवभिरिति। वक्ष्यमाणगोप्यादिष्वप्यस्त्वपि हास्यादिनवरसाऽवच्छिन्न
त्वेन नवत्वमनतीतत्वात्। नवैव व्याख्याणीति वन्नवभिरित्युक्तं। नवविधैरित्यर्थः। तदेवमु
पास्यस्य साधनोपास्तिरूपासकश्चेति त्रयं प्रकरणार्थ इत्युक्तं। अयमेव पादश्चतुष्टयार्थः
क्रमात् प्रकरणचतुष्केणाभिधीयते। एतावानेव भागवतेऽनुष्ठेयोऽर्थः। पूर्वं तत्रैवोक्त
मिति निदर्शितं। महाप्रयोजनादयस्तु धर्मः प्रोज्झित इत्यत्र टीकायामुक्ता इहानुसंधे
याः। तत्रैकैव व्युत्पत्तिः प्रयोजनं। भक्तियोगोऽभिधेयः। निर्मत्सरत्वविशिष्टं सत्त्वमधि
कारिविशेषणं। नवर्णाश्रमादि। मत्सरः परोत्कर्षाऽसहनं। सत्त्वमास्तिकत्वमिति। पूर्वं
विप्रकीर्णानामुपास्यादीनां प्रसंगांतराऽसंकरेण विविक्ततयैकत्र प्रतिपत्तिरिहावांत
रप्रयोजनं। अत एवेदं प्रकरणमित्याख्यापनं। यदाहुः। शास्त्रैकदेशसंबद्धं शास्त्रकार्यांत २

रे स्थितं। आहुः प्रकरणं नाम ग्रंथभेदं विपश्चित इति। इह च स्वकर्तृकेपि यदुराजमहामंत्रि
णा हेमाद्रिणाभ्यर्थितस्तत्कर्तृकं ख्यापितवान्। तदेतदाह। विष्ण्वित्यादि॥ ॥मू॥ विष्णुप्रीत्यैव
तुर्वर्गचिंतामण्यामजीगणत्। भेदान् व्रतानां दानानां तीर्थानां मोक्षवर्त्मनां। १। मूर्त्तिप्रासाद
पूजानां हेमाद्रिर्गणकाग्रणीः॥ विष्णुभक्त्यंगभक्तानां गणयत्युक्तसारधीः। २॥ ॥चतुर्णां
धर्मादीनां वर्गश्चतुर्वर्गः। तत्रेष्टसमर्पकोऽयं चिंतामणिः। मणिर्द्वयोरित्यभिधानात् पुंस्त्री
त्वात्तस्मिन् हेमाद्रिर्व्रतादिभेदानजीगणत्। गणेर्णिजंताल्लुङ्। मणिर्वा। विद्वद्भिर्गणयामा
सेत्यर्थः। अन्यत्र स्थितानां व्रतादिव्याख्यानां पुष्पाघ्रातेष्वेकत्र लेखनं न तु स्वयं निष्पाद
नमिति गणयतीत्यर्थः। व्रतादिभेदाश्च क्रमात् दानतीर्थमोक्षपरिशेषपूर्वेषु पंचसु खंडेषु
मोक्षवर्त्मानि मोक्षोपायाः। मूर्त्तयः प्रतिमाः। प्रासादा देवकुलानि गणकाग्रणीः। गणकेषु
देशकोशयोरायव्ययौ लिखत्सु अग्रणीः मुख्यः। विष्ण्वादीनां चतुर्णां द्वंद्वः। तेषां भेदा नित्ये

वा। ननु तद्दर्शित ... त्र संमिलिते ग्रंथे पि किमपरमवशिष्टं यदर्थमस्यारंभ इति तत्राह। उ
त्कर्षस्य र धीरिति। उत्कर्ष्यो व्रतादिभ्यः सारे श्रेष्ठे विष्ण्वादिविषये धीर्यस्य सन्तु या। अस्मृतास्त्री
रमंहारकुसुमोत्करवीचिषु। ये यदुवंशस्थानावस्त्रीत्यादिदर्शनाद्धिकरणेपि बहुव्रीहिः।
अयमर्थः। प्रथमं भगवत्प्रीत्यर्थमुक्तावचानि क्लेशभूयिष्ठानि सोपायान्यनेकानि कानि
बहिरंगाणि विष्णुव्रतदानादीनि तत्र गणितानि तत्तत्सेवनतुष्टः। न हि जन्तुं मोक्षैकफलमुप
यं प्रकटयितुमिदमचीकरत्। ननु व्रतादिनेहाश्रिता मलिना गणिताः। विष्ण्वादिभेदाः पुनः
कैनेति तत्राह। मुक्तेति॥ ॥मू०॥ मुक्ताफलेन ग्रंथेन सद्भागवतभक्तिना॥ भक्तिस्थाल्यं बुनाम्नु
स्वमार्गे ... यशिष्टप्रिया॥ ॥अथ नैयंर्थः संदर्भः सोस्मिन्नस्तीति ग्रंथं प्रकरणं। अर्श आ
दित्वादच्। यत्राभिन्नरूपे शब्देनन्तद्वतोऽभिधानं तत्सर्वमिहेतिद्रष्टिकारः। यद्वा ग्रंथशब्दो
नपुंसकेप्यस्ति। तथा हि पाणिनिना स्वकीये लिंगानुशासने घोपधइत्यधिकृत्य काष्ठरि

विश्वकर्मशास्त्रदर्शितारहंसारूढा चतुर्मुखी चतुर्भुजा तप्तकाञ्चनवर्णा शुक्लवस्त्रा लंबकूर्चा तुंदिला सौम्या पिं
गाक्षी सोत्तरीयोपवीता योगपट्टासना जटामुकुटालंकृता अक्षसूत्रपुस्तककमंडलुस्रुचा न दधानेति॥ कृपया
अवलोकः कृपावलोकः तेन हंसवदनेन चतुष्पदं मितान् प्रसन्नत्वेन ताण्पितान्॥ तेषां शोकविचिषा प्रभया प्र
तिहतेभ्यः धातन्नीति॥ मुनिरत्रिः॥ ॥विश्वोद्भवस्थितिलयेषु विभिद्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः॥
॥ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एक भगवान्मदिहोपहूतः॥ एको मयेह भगवान्विविध
प्रकारैः प्रियीकृतः प्रजननाय कथं नु यूयं॥ इहागतास्तनुभृतां मनसोपि दूराद्ब्रूत प्रसीदत महानिह
विस्मयो मे॥ ॥अनुयुगं कल्पे कल्पे। विशिष्टवेषादेश्यो। ते प्रसिद्धाः। तेभ्यः सकाशात् एक एवोपहूतः
... इति युष्माभिरेव कथनीयः॥ प्रणिधानं प्रकृष्टधारणा। अचिन्तं चिन्तं कृतं प्रियीकृतः चिन्तनैक
नीत इत्यर्थः॥ प्रजननाय पुत्रोत्पत्त्यै। एकस्मिन् ध्याये यूयं त्रयः कथमत्रागता इति ब्रूत॥ दूराद्गोच
रा जन्मादित प्रसादं कुरुत इह त्रयाणामागमने॥ एतेन अवितुस्तोत्राधिकारी ति ज्ञेयं॥ अत्रिर्हिरजस्त

क्षाधिपतिर्भेरीशब्दैर्मनोजवः॥ विजयं दिक्षु सर्वासु महोत्सवमघोषयत्॥ ॥विजयं जितं विष्णुनेत्यघोष
यत्। महानुत्सवो दिक्षु यस्मात् द्विजमात्॥ जांबवान् हि त्रिविक्रमं प्रदक्षिणीकृतवान्। सुखेणेन मया चैवतद
विष्णुः सनातनः॥ प्रदक्षिणीकृतः पूर्वं क्रममाणः त्रिविष्टपमिति हि कैश्चिद्धेतवाक्यं॥ शुकः॥ ८।२०॥ एवं वि
त्रैगुण्यधारणं प्रथमभूमिकामुक्त्वा तत्र स्थिरचेतसो द्वैगुण्यधारणं द्वितीयभूमिकामाह॥ ब्रह्माणं॥ ॥ब्रह्म
विष्णुरुद्ररूपाणि॥ ॥विष्णुग्रहणं तु लोकानुरोधात्। लोके च यद्यपि त्रयाणां प्रतीतिस्तथापि द्वयोरेवात्राभि
प्रेतम्॥ द्वैगुण्यधारणाया विवक्षितत्वात् विष्णुरूपस्य वक्ष्यमाणत्वाच्च। न च द्वयोर्युगपद्ध्यानानुपपत्तिः
हरिहरार्द्धनारीश्वरादिवदुपपत्तेः॥ ॥वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान्॥ कृपावलोके
न हसद्वदनेनोपलंभितान्॥ तयोर्विषापातिहते निर्माल्यमुनिरक्षिणी॥ चेतस्तत्स्ववर्णं युंजन्नस्तावीत्संहतां
जलिः॥ ॥वृषहंससुपर्णस्थान् रुद्रादीन् अस्तावीदिति संबंधः॥ तत्र वृषभरूढाः षड्भुजगापरशुपाणिकपा
लालंकृतचतुर्भुजाश्चर्मवसना भस्मांगरागाः फणिकपालविविधभूषणाः रुद्रमूर्तिर्धिंसा॥ ब्रह्मस्त्रिस्तु

भिः प्रकृतयः समशीलाय जंति हि। पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः इति॥ एवं मूर्द्धित्रिदयध्यानेष्वभे
दं भावयेदित्याह॥ ॥यथाकृतस्ते संकल्पो भाव्यं तेनैव तन्नया॥ सत्संकल्पस्य ते ब्रह्मन् यद्वै ध्यायसि ते वयं॥
इति विष्णोर्लक्षणं भेदाश्च॥ ॥तेत्वया॥ एवशब्दो भिन्नक्रमः। अन्यथानन्यभाव्यमेवेति॥ यतस्त्वं सत्संक
ल्पः अतस्तव संकल्पभंगो मा भूदिति त्रयो वयमागताः इत्यर्थः॥ एकस्यैव त्रिधाधिष्ठातृत्वात्॥ मैत्रेयो विदु
रा॥४॥१॥३१॥ ॥इति कैवल्यदीपिकायां विष्णोर्लक्षणं भेदाश्च॥ ॥एवं धारणाद्वयाभ्यासबलाज्जि
तरजस्तमस्कस्य मुमुक्षोः सत्वजयार्थं शुद्धसत्वधारणां तृतीयभूमिकामाह॥ विष्णुरूपमिति॥ ॥तत्रा
द्भुतं वै भुवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्रशोभितं॥ तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्द्धन्यफणाम
णिद्युभिः॥ विभ्राजमानं द्विगुणेक्षणोल्बणं सिताचलाभं शितिकंठजिह्वं॥ ददर्श तद्भोगसुखासनं विभुं म
हानुभावं पुरुषोत्तमोत्तमं॥ सांद्रांबुदाभं सुपिशंगवाससं प्रसन्नवक्त्रं रुचिरायतेक्षणं॥ महामणिव्रातकि
रीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलं॥ ॥तत्र गर्भोदके भवनादिकमच्युतो ददर्शेति ज्ञेयरेणान्वयः॥

ऽक्मन्नमं शोभाढ्यं॥ भ्राजंतो मणयो येषु स्तंभसहस्रेषु तैः शोभितं॥ तस्मिन् भवने ऽनंतं शेषं प्रधाना
त्मकं ददर्श॥ सहस्रमूर्द्धन्याः श्रेष्ठाः ये फणाः अर्पिताः मणयः तेषां द्युभिः द्विगुणं सहस्रापेक्षं सिताचलाभं
श्वेतपर्वतसदृशं॥ शितयो नीलाः कंठा जिह्वाश्च यस्य स तथा॥ तस्य शेषस्य भोगः शरीरं विभुं प्रकृतेरधिष्ठा
तारं पुरुषं। अत एव विशेषणद्वयं। अनुभावः॥ पुरुषोत्तमेषु ब्रह्मादिषु उत्तमं॥ मुक्तेषु वा नित्यमुक्तत्वा
न्॥ तथा च सूत्रद्वयं॥ तत्र निरतिशयं सर्वज्ञबीजं। स पूर्वेषामपि गुरुः कालेनानवच्छेदादिति। अस्य च लील
याशरीरग्रहणं॥ सु पिशंगं पीतोज्वलं। आयतं दीर्घं महामणीनां व्रातः स्तोमो यत्र किरीटकुंडलयोश्च
तेषां प्रभया परिक्षिप्ताः व्याप्ताः सहस्रं बहवः कुंतलाः केशाः यस्य स तथा तं॥ ॥प्रलंबचार्वष्ट
भुजं सकौस्तुभं श्रीवत्सलक्ष्म वनमालयावृतं॥ सुनंदनंदप्रमुखैश्च पार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायु
धैः॥ ॥ आयुधादेर्विशेषः प्रकृतं॥ ॥पुष्ट्या श्रिया कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमाणं परमेष्ठिनां
पतिं॥ ववंद आत्मानमनंतमच्युतो जिष्णुश्च तद्दर्शनजातसाध्वसः॥ ॥कीर्तिश्च अजा च कीर्त्यजा १७

तया॥ अजा माया॥ द्वंद्वैक्येपि न नपुंसकत्वं॥ उकालोज्झ्रस्वदीर्घप्लुत इतिवत्॥ अखिलर्द्धिभिः अणिमा
दिसर्वसिद्धिभिः॥ परमेष्ठिनां परमैश्वर्यवतां पतिं स्वामिनं। अत्राधिकारिणमाह॥ ववंद इति॥ आत्मानं तस्यैव
रूपत्वेन वैलक्षण्याभावात्॥ प्रदीपादिव प्रवृत्तस्य दीपस्य॥ जिष्णुरर्जुनः॥ स तु दर्शनेन जातभयः॥ एतेन
शुद्धसत्त्वोत्राधिकारीत्युक्तं॥ शुक॥१०।८९॥ नन्वीदृशमेव चेद्विष्णुरूपं॥ तत्कथमन्यथा तत्र तत्रोप
वर्ण्यते इति तत्राह॥ नेदृगेवेति॥ अत्र हेतुहेतुमाह॥ इच्छेति॥ इच्छारूपत्वात्॥ इच्छैव रूपं यस्य स तथा तत
स्य भावः॥ तस्मात् भक्तेच्छयैव चतुर्भुजाद्याकारेण परिणमतीत्यर्थः॥ अत्रैव मूलं योग्य उज्जयंति॥ ॥त्वं भाव
योगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसां॥ यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः
प्रणयसे सदनुग्रहाय॥ ॥हे उरुगाय विष्णो त्वं भावयोगेन भक्तियोगेन परिभाविते विशोधिते हृत्सरोजे
आस्से अभिव्यक्तः सन् तिष्ठसि॥ तत्र हेतुः॥ श्रुतेन शास्त्रेण ईक्षितः निरूपितः पंथाः स्वरूपस्थितिर्य
स्य स तथा वेदांतप्रमाणमित्यर्थः॥ अत्र ते भक्ताः यद्यद्वपुः स्वधिया विभावयंति चिंतयंति॥ तत्र त्वं एव

से निमीलि। व्यापित्वेन हृदयस्थोऽपि भक्तैर्यनिकेनाप्याकारेणाविषयीकृतस्तदनुग्रहाय प्रकटोऽसीति भावः ॥ ब्र
ह्मा विष्णुं ॥ ३।२४ ॥ किंच ॥ ॥ तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ॥ यानि यानि च रोचंते स्वजनानामरूपिणः ॥ ॥ ते त्वयैव हेतुना अभिरूपाणि सुंदराणि। नतु भूषणाद्युपाधिना स्वभावसुभगानीत्यर्थः ॥
येभ्यो भक्ताः स्पृहयंति तान्येव ते रूपाणि न तु स्वतः सिद्धानीत्येव शब्दार्थः ॥ अत उक्तं ॥ इच्छारूपत्वादिति
॥ अरूपिणः ॥ वस्तुतस्त्वरूपोऽपि भक्तेच्छया रूपवानित्यर्थः ॥ कर्दमः ॥ कपिलं ॥ ३।२४ ॥ एवं भगवतः पंचप्र
भेदानन्तःकरणतो रूपतश्च विविच्य पंचानामपि साम्यप्राप्तावुत्तराधरभावं विवेक्तुमाह ॥ ॥ शुद्धसत्त्वविष्णु
रूपमेवोपास्यतमं ॥ ॥ शुद्धं रजस्तमोरहितं ॥ सत्त्वमस्मिन् विष्णुरूपे स्पष्टमर्थात् स्थूलरुद्ररूपमुपास्यतरं ॥
पुरुषरूपं तूपास्यमिति ॥ अयमर्थः ॥ स्थूलसूक्ष्मक्रमेण बुद्ध्यार्थमवगाढं तद् इति प्रथमं त्रिगुणा
त्मके भगवद्रूपे मनः प्रणिधाय तत्र च स्थिरं सत् द्विगुणात्मके ततः परं सत्त्वैकगुणे। ततश्च निर्गुणे सूक्ष्मे
ब्रह्मणि प्रवेशयन् निरतिशयानंदलाभेन ध्यानकृतकृत्यतामेतीति। ते चामी साकारध्यायिनो म १७

दुमध्याधिमात्रोपायत्वेन त्रयः प्रत्येकं मृदुमध्याधिभेदत्वेन नव स्फुरिति योगशास्त्रे ॥ तत्राद्ययोरवस्था ॥
भेदाद्वैदपद्धः स्वयमुन्नेयः ॥ अंशस्य तु भेदत्रयं वक्ष्यति ॥ एक एवावस्थाभेदात्त्रिविधेत्यर्थः ॥ उक्तमर्थं
दर्शयन्नाह ॥ ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरि
विरंचिहरेति संज्ञाः श्रेयांसि तत्र खलु स — तोर्नृणां स्युः ॥ ॥ अस्य प्रपंचस्य स्थित्यादये। स्थितिसृ
ष्टिसंहारार्थं सत्त्वादिभिर्युक्तः अंशत्रयं धत्ते ॥ तत्र सत्त्वतनोर्विष्णोः श्रेयांसि शुभफलानि स्युः ॥ खलुशब्दो
निश्चये ॥ स चातिशयं तमेवार्थं गमयतीत्युपास्यतमत्वं ॥ यद्यप्यंशतः सत्त्वसद्भावादन्येषामपि सत्त्व
तुल्यं तथाप्यभ्रको वायुभवादिव सत्त्वमेव तत्तनुर्यस्येति शुद्धसत्त्वत्वं ॥ रजस्तमसोः। सदपि सत्त्वेन
फलप्रदं किंतु शुद्धमेवेति भावः ॥ सूतः ॥ शौनकं ॥ १।२ ॥ तदेवाह ॥ ॥ सत्त्वं विशुद्धं श्रयते भवान्
स्थितौ शरीरिणां श्रेयउपायनं वपुः ॥ वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते
॥ सत्त्वं वपुरिति सामानाधिकरण्यं। स्थितौ निमित्ते। श्रेयसि केवलमेवोपायनं उपायभूतं ॥ तदा

देति ॥ येन सत्त्ववपुषा श्रितेन जनस्तवार्हणं पूजां समीहते सम्यक् करोति ॥ शुद्धस्याविशत्वात् स
त्त्वोपहितं भजतां विभाव ॥ क्रियायोग इत्येकं ॥ ततश्च वेदादिश्चतुर्भिः कर्मादाश्रमिणः पूजयं
ती । तच्चतुर्णां युक्तिः ॥ यद्वा वैदिकनवैदिकाः क्रियया पांचरात्राः योगेन प्रकृतिपुरुषविवेकोपायेन सां
ख्याः ॥ तपसा तपस्विनः । शैवाः पाशुपताश्च । समाधिना पातंजलाः ॥ सत्त्वोपाधेरेव तत्तत्कृष्टेस्तत्तत्त्रा
भिधानमिति प्रागुक्तं ॥ पंचैव मार्गाः ॥ एतो मार्गपंचकविषयत्वेन पंचानामुक्तिः ॥ सत्त्वं वपुरित्युक्तं ।
तदग्रह्ममाणं प्रतिविपक्षे बाधमाह ॥ ॥ सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं
॥ गुणप्रकाशैरनुमीयते भवान् प्रकाशते यस्य च येन वा गुणः ॥ ॥ हे धातः इदं प्रागुक्तं विशुद्धं सत्त्वं
निजं वपुः शब्देन स्वरूपं न स्याच्चेत्तर्हि विज्ञानं विशिष्टं ज्ञानं मार्जनं लोपं ज्ञापयत्प्रानुयात् ॥ लोको क्या
लिदृष्टयोगः ॥ निर्मलत्वाभावात्तस्या इत्यर्थः ॥ ज्ञानं हि सत्त्वादुत्पद्यते ॥ तद्धे सत्त्वं नास्ति तदा ज्ञानम
पि न स्यात् ॥ दृश्यते च ज्ञानं । अतः सत्त्वं वपुरित्यनुमीयस इत्याह गुणेति ॥ गुणप्रकाशैः सत्त्वजन्यैर्विषय १८

शकद्यैः ॥ ननु सत्त्वस्य जडत्वात् कुतः प्रकाश इत्यर्थः ॥ एवमपि सत्त्वमेव प्रकाशकं न तु रजस्तमसी
तयोरसत्त्वेन चितिसंक्रांत्यनुपपत्तेः ॥ यथा रवितेजो दर्पणादिष्वेव प्रादुर्भूय मुखादि प्रकाशयति न
घटादिषु । अस्तु तर्हि सत्त्वयोगान्निस एव न त्वेद्धिक इत्यत आह ॥ ॥ न नामरूपे गुणकर्मजन्मभिर्निरू
पितव्ये तव तस्य साक्षिणः ॥ मनोवचोभ्यामनुमेयवर्त्मणो देव क्रियायां प्रतियंत्यथापि हि ॥ ॥ नामरूपे योगि
कंद ॥ रूपं श्यामादि । गुणः सौंदर्यादिः । कर्म चरित्रं निग्रहानुग्रहरूपं ॥ जन्म शरीरग्रहणं ॥ सहार्थे तृतीया ॥ न
निरूपितव्ये निरूपयितुमशक्ये ते ॥ अपार्थोलोपः ॥ नामादि रूपं के स्तव वक्तुं न शक्यते ॥ कुतः साक्षिणः
॥ तं हि तेषां साक्षी द्रष्टा द्रष्टुश्च दृश्यत्वानुपपत्तिः ॥ साक्षित्वमेव कुत इति चेत्तत्राह ॥ तस्येति ॥ तस्य समाधो
निश्चातत्तया अनुभूयमानस्य अनुभूतिवाचित्वाक्षस्य । तत्कृष्टस्य यत्कृष्टानपेक्षा ॥ यद्वा ॥ वत्कोपि नीभयपु
तानि श्रुतकांतां तेलोचनैः प्रतिदिशं विधुरे क्षिपंती लाद्यो ॥ अनुभूतिमप्रकाचानं इत्याह ॥ मनइति । यत
नमनोवत्सि प्रसरतः सकश्चिदस्तीत्यनुमानं ॥ हे देव । अथापि एवमपि क्रियायां षोडशोपचारपू

वै ...तियंतिजानाति॥ वस्तुतस्त्वसत्यपि लयविरागादिप्रवृत्त्यर्थं भक्ताः कल्पयंतीत्यर्थः॥ ननु नामादे
त्वोप ...श्च किंचित्करत्वं स्यात् तत्राह॥ ॥एवं हरौ भगवति प्रसमरणं श्च चिंतयन्नामानि रूपाणि चमं
गल॥ ॥ क्रियासु यस्त्वच्चरणारविंदयोराविष्टचित्तो न भवाय कल्पते॥ ॥संसार-पन्नगैः रूपाणि चर्या
ति चकारात् गुणकर्मजन्म। न च ज्ञानाविष्टत्वमवस्थांतराविकारः। भवः संसारः॥ एवं वासस्वस्यापि स।
सार्थहेतुत्वं रज्जुसर्पादिरिव भयादिहेतुत्वमित्यर्थः॥ तस्मात् सिद्धमस्योपास्यतमत्वं॥ वृत्तायाः॥ क
थं॥२०॥ अधिमात्रोपायसिद्धं तु क्तो तत्र मध्यधिमात्रमाह॥ ॥विष्णुरूपस्यावयवशो रूपं क्रमेण पाद
दिहसितांतमुपास्यतमं॥ ॥सहितस्य अवधित्वं प्रकाशमात्रत्वेन निराकारसन्निकृष्टत्वात् मल
माह॥ ॥तस्मिंल्लब्धपदं चित्तं सर्वावयवसंस्थितं॥ विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः॥ ।तस्मि
न्निति विष्णुरूपे॥ पदं स्थैर्यं विलक्ष्य एकैकमंगं विवेकेन लक्षीकृत्य॥ ॥संचिंतयेद्भगवतश्चरणार
विंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं॥ उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्ध १८

दयांधकारं॥ ॥चक्रवालं मंडलं॥ महतः ध्यातुः हृदयं। दक्षिणमंघ्रिं ध्यात्वा गंगायाः प्रभवं वामं॥ ॥ध्या
येदित्याह॥ ॥यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्॥ ध्यातुर्मनः
शमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं॥ ॥सरित्प्रवरा गंगा। तीर्थं तारकं। अधिकृते
न धृतेन। स्वाभाविकत्वे शिवत्वे निमित्तोत्प्रेक्षेकृते॥ शिवइति॥ तस्माच्छब्दादिमंतरेणाप्युपलंभाद्द
प्रयोगः॥ शमलं पापं॥ ॥जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवंदितया विधातुः॥
ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात्॥ ॥अखिलस्य विधातु
र्लक्ष्मणा जनन्या एवंभूतयापि संलालितमित्यतिशयार्थं विशेषणत्रयं॥ ऊर्वोरित्यादरार्थत्वाद्विषे
...र्पणेन चातुर्येण एतत्परमसौकुमार्यार्थं॥ ॥ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी
...कोकुसुमावभासौ॥ व्यालंबिपीतवरवाससि वर्तमानकांचीकलापपरिरंभि नितंबबिंबं॥
...अधि उ ऊर्ध्वभागे ओजो बलं तेज व्यालंबि विततत्वात् विन्यस्तविशेषार्थं॥ वर्तमानो वरवासः

जायां॥ [illegible] मानः तदुपरि विद्योयः कांचीकलापः तस्य परिरंभः सर्वतः संश्लेषो यस्यास्तितत्॥ श्रीकटी
रवास्तनं [illegible] व्यकुंनितंबंस्तद्॥ ॥नाभीह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोक
पद्मं॥ व्यूढं हरिन्मणिमुखस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरं॥ ॥गुहा नीरंध्रः आश्रयः
। अत्र ह्रदे आत्मयोनेर्ब्रह्मणः धिषणं स्थानं पद्ममासीत्॥ हरिन्मणिरूपो मरकतश्चेव श्यावियोस्त
नौ तयोर्द्वयं मुखं सुश्लिष्टं॥ ॥वक्षोधिवासमृषभस्य महाविभूतेः पुंसां मनोनयनानिर्वृतिमाद
धानं॥ कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य॥ ॥ऋषभस्य विष्णोः
॥महाविभूतेर्लक्ष्म्याः अधिवासं स्थानं॥ पुंसां किं पुनः स्त्रीणां॥ कौस्तुभस्य अधिकमा धिक्येन भूषण
मर्थः प्रयोजनं यस्य स तथा॥ कंठेन कौस्तुभः शोभत इत्यतिशय॥ ॥बाहुंश्च मंदरगिरेः परिवर्त्तने
न निर्णिक्तबाहुवलयानधिलोकपालान्॥ संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करसरोरुहरा
जहंसं॥ ॥परिवर्त्तनं सन्धापसव्यभ्रमणं निर्णिक्तं शोधितं॥ अधिलोकपालान् लोकपालाधिष्ठान् २०

दशशतारं चक्रं॥ शंखस्य सर्वतः शौक्ल्येन मुखमरुतयो लौहित्येन च राजहंसोपमा॥ कौमोदकीमिति॥ कौ
मोदकीं भगवतो दयितां स्मरेत्तदिग्धामरातिभटशोणितकर्दमेन॥ मालां मधुव्रतवरूथगिरो
२१ पघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कंठे॥ ॥दिग्धां लिप्तां भटायोद्धारः वरूथः समूहः उपघुष्टा
वाचाली कृता चैत्यस्य जीवतत्त्वस्य॥ तत्त्वं कारणं परज्योतिस्तद्रूपं मणिं कौस्तुभं॥ ॥भृत्यानुकंपित
धियेह गृहीतमूर्त्तेः संचिंतयेद्भगवतो वदनारविंदं॥ यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतिता
मलकपोलमुदारनासं॥ ॥वल्गितं चलनं॥ ॥यच्छ्रीनिकेतमलिभिः परिषेव्यमाणं भूत्या स्वया
कुटिलकुंतलवृंदजुष्टं॥ मीनद्वयाश्रितमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु॥
॥ यद्वदनाब्जं श्रीनिकेतं पद्मं अधिक्षिपत्॥ विशेषणप्रधानो निर्देशः॥ श्रीनिकेतत्वादि धर्म
ज्ञानं [illegible] क्षिपतीत्यर्थः॥ तत्र स्वभूत्या श्रीनिकेतत्वस्याक्षेपः॥ कुंतलैरलिषु कृतस्य॥ नेत्रद्वये
॥ [illegible] पयुक्तस्य॥ मनोमयं मनसः परिणामं॥ ॥तस्माच्च लोकमधिकं रूपयातिघोर

.पश्यमनायनिसृष्टमन्दगोः।।स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विततभा
वनया गु[illegible]।। ।।अनुगुणितं युक्तं।विपुलो बहुः।।गुहायां हृदि।। ।।हासं हरेरवनताखिल
लोक[illegible]तीव्रशोकाश्रुसागरविशोषणमत्युदारं।संमोहनाय रचितं निजमाययास्य भ्रूमंडलं
मुनिकृते मकरध्वजस्य।। ।।निजमायया अस्य जगतः संमोहनाय रचितं हासं ध्यायेत।।मु
नीनामपि मोहनं माभूदिति।।तत्संमोहनप्रवृत्तस्य कामस्य संतर्जनेन संमोहनाय रचितं भ्रूमंडलं
ध्यायेत।।अव्यक्तं हसितमुक्त्वाऽस्य व्यक्तं प्रहसितमाह।। ।।ध्यानायनं प्रहसितं बहुलाधरोष्ठ
भासारुणायिततनुद्विजकुंदपंक्ति।।ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना
न पृथग्दिदृक्षेत्।। ।।प्रहसितं प्रकाशमात्रत्वात् निराकारेण स्मर्तेति।।अत एव ध्यानायनं ध्यानवशा
नास्पदत्वात्।बहुलया अधरोष्ठस्य भासा अरुणायिता गौरदीप्तिं नीतास्तनूनां द्विजानामेव कुं
दकलिकानां पंक्तिर्यत्र तत्।।देहकुहरे हृदयाकाशे।अवसितस्य स्थितस्य।।आनंदरसेन।।इत्थंकृतध्य २१

तिरिक्तं न दृष्टुमिच्छेत।।ध्यानमुक्त्वा ।एवं दृश्यविशिष्टदृष्टध्यानेन ह
रौ दृष्टरि [illegible]तिलब्धभावः।।पुनर्लब्धरति।।ए .प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पु
लकः प्रमोदात्।।औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते।। ।।
२४ एवं विशिष्टदृष्टध्यानेन हरौ दृष्टरि प्रतिलब्धभावः पुनर्लब्धरतिः।।तदृश्यं शनकैर्वियुंक्ते त्यजति
।।यतस्तच्चित्तं बडिशं चपलस्य चित्तमत्स्यस्य बंधनार्थमुपात्तं।।यद्यपि तस्मिन् भक्त्याग्रहात्तेप्र
मादरं च न।।हृदये द्रवत्युत्पुलकश्च भवति।।तथाप्यौत्कंठ्यबाष्पकलया मुहुरर्ध्यमानश्च भवति।।अ
तस्तदपि त्याज्यं।।क्रियाजन्यं हि तत्सुखं।क्रिया च द्वितीये क्षणेन श्यति।।सच क्षणकाल्पं दुःखजे
नदुःखेन दुःसहः।।इदमत्र तत्त्वं।।ध्येयालंबनस्य प्रत्ययस्य सदृशः प्रवाहः प्रसंख्यांतरेणापरा
मृष्टो ध्यानं।।ध्यानमेव ध्येयाकारनिर्भासप्रत्ययात्मकेन स्वरूपेण शून्यमेव ध्ये ।।

निराकारे

सा॰रूणायिता ।ौदि

याकाशं॰प्रवसितस्य॰स्राई ।॰ज्ञान

२२